# SAN201

## वेदविषयः

## ब्राह्मणग्रन्थस्य सामान्यपरिचयः

ब्राह्मणशब्दस्य विषये सामान्यतया धारणोऽयं समुपस्थीयते यद् ग्रन्थवाचकब्राह्मणः ब्रह्मन् इति शब्दादेव निष्पद्यते तथा यागवाचकब्राह्मणशब्दो 'बृह'वर्द्धने इत्यस्माद्धातोः वृद्धिरर्थमेव द्योतयति। अनेन बुध्यते यद् विविधयज्ञस्य क्रियायाश्च वाचकशब्द एव ब्राह्मणग्रन्थ इति।

आपस्तम्बपरिभाषासूत्रस्य व्याख्यानावसरे कपर्दी कथयति- मननात् मन्त्रस्तथाभिकथनाद् ब्राह्मण ग्रन्थोऽभिधीयते। "मन्त्रो मननात् ब्राह्मणमभिधानात्" इति। ग्रन्थवाचकब्राह्मणशब्दस्य तैत्तिरीयसंहितायाम् प्रयोगो लभ्यते। तत्रोच्यते- "एतद् ब्राह्मणान्येव पञ्चहवींषि।" ब्राह्मणग्रन्थेषु, निरूक्ते, अष्टाध्याय्याञ्च प्रयोगः प्राप्यते। ब्राह्मणशब्दस्य पुल्लिङ्गेऽपि प्रयोगो भवति। वैदिकसाहित्ये वाक् शब्दः सत्य यज्ञस्य वा अर्थेषु प्रयुज्यते, परन्तु बौद्धायनधर्मसूत्रे वाक् शब्दस्य ग्रन्थस्यार्थे प्रयुज्यते। वागिति ब्राह्मण उच्यते। "श्रुतिर्ब्राह्मणम्" इत्यकथयत्- भाष्यकार उब्बटः।

सामान्यतया अस्य ग्रन्थस्य प्रयोजनमिदं वर्तते यत् संहितायां समुल्लिखितो विषयस्य व्यवहारिकप्रयोगस्य ज्ञानं प्रदातुमेव वर्तते। अत एव ब्राह्मणग्रन्था मन्त्राणां व्याख्यात्मकरूपेण मन्यन्ते।

अस्य ग्रन्थस्य विषयस्वरूपञ्च किम्? इत्यस्मिन् विषये सवरस्वामी कथयति-

*हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।*
*परक्रिया पुराकल्प व्यवधारणकल्पना।।*
*उपमानं दशैते तु विधयो ब्राह्मणस्य तु।।*

अस्यैव विवेचनस्य वर्णनं कात्यायनेनापि कृतम्। ब्राह्मणग्रन्थस्य प्रतिपाद्यविषयविधिस्तथा अर्थवादश्च विधिरेव कर्मणि प्रवृत्तिं करोति। सायणमते विधिः प्रकारद्वावेव स्तः - अप्रवृत्तप्रवर्तकः, अज्ञातज्ञापकश्च। कर्मकाण्डसम्बन्धितः यो विधिः, स अप्रवृत्तेष्वेव प्रवर्तयति। विधेरवशिष्टो भागः अर्थवादश्चोच्यते। "ब्राह्मणशेषोऽर्थवादः" इति।

पुरा वैदिककाले चतुर्णां वेदानां ११३० संहिताः समुपलभ्यन्ते स्म। तेषां समेषामेव स्वब्राह्मणभागा आसन्, परन्तु अधुना ता सर्वा अप्राप्या एव। तेषु भागेषु केचन भागाः सन्त्यवशिष्टाः। पण्डित-रामगोविन्दत्रिवेदिनां मते अष्टावेव प्रमुखब्राह्मणग्रन्थाः अधुना समुपलभ्यन्ते। परन्तु समयेऽस्मिन् निम्नोल्लिखिताः ब्राह्मणग्रन्थाः-

ऋग्वेदीयब्राह्मणः – ऐतरेयब्राह्मणः, कौषीतकिब्राह्मणः (शाखायन)

यजुर्वेदीयब्राह्मणः – शतपथब्राह्मणस्तथा तैत्तिरीयब्राह्मणश्च।

सामर्वेदीयब्राह्मणः - पञ्चविंशषड्विंशसामविधानार्षेयजैमिनीयाः प्रभृतयः।

अथर्ववेदीयब्राह्मणः – गोपथब्राह्मणः।

ब्राह्मणग्रन्थानां यज्ञानुष्ठानन्तथा विधिर्यज्ञादीनां वर्ण्यविषयाः सन्ति। कर्मकाण्डयज्ञयोः प्रक्रिया का इति विषये व्याख्यानं (ज्ञानम्) सम्यक्तया प्राप्यते। केचन लौकिकजनाः ब्राह्मणग्रन्थस्यौचित्यं जानन्ति। गीतायामपि विषयेऽस्मिन् समुद्घोषितो वर्तते- सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते इति। आत्मपरमात्मनोः अन्तःसम्बन्धो न वा? इत्येतेषु विषयेष्वपि वर्णनं विद्यते।

यद्यपि मन्त्रसाहित्यस्य पवित्रता सर्वोत्तमैव। ब्राह्मणग्रन्थस्यार्थ- ब्रह्ममन्त्रौ वर्तेते। कर्मज्ञानवास्मिन्नेव समाविष्टौ स्तः। येन मन्त्राणां बोधो न भवति, तत्र विशिष्टव्याख्यायाः आवश्यकता दरीदृश्यते। तत्रैव च कर्मकाण्डेन सह सम्बद्धप्रकरणस्य महती व्याख्या विहिता।

अत एव ब्राह्मणग्रन्थो गार्हस्थ्यादीनां कृते मोक्षसाधनरूपेणावस्थितो वर्तते।